# दुर्गा सूक्तम्

# *durgā sūktam*

जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः ।

*ja̱tave̍dase sunavāma̱ so̍mamarātīya̱to nida̍hāti̱ veda̍ḥ|*

स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरिताऽत्यग्निः ॥ १ ॥

*sa na̍ḥ parṣa̱dati̍ du̱rgāṇi̱ viśva̍̄ nā̱veva̱ sindhu̍ṁ duri̱tā'tya̱gniḥ || 1||*

तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम् ।

*tāma̱gniva̍rṇā̱ṁ tapa̍sā jvala̱ntīṁ vai̍roca̱nīṁ ka̍rmapha̱leṣu̱ juṣṭā̎m |*

दुर्गां देवीगं शरणमहं प्रपद्ये सुतरसि तरसे नमः ॥ २ ॥

*du̱rgāṁ de̱vīgṁ śara̍ṇama̱haṁ prapa̍dye su̱tara̍si tarase̱ nama̍ḥ || 2||*

अग्ने त्वं पारया नव्यो अस्मान्त्स्वस्तिभिरति दुर्गाणि विश्वा ।

*agne̱ tvaṁ pā̍rayā̱ navyo̍ a̱smāntsva̱stibhi̱rati̍ du̱rgāṇi̱ viśvā̎ |*

पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शंयोः ॥ ३ ॥

*pūśca̍ pṛ̱thvī ba̍hu̱lā na̍ u̱rvī bhava̍̄ to̱kāya̱ tana̍yāya̱ śaṁyoḥ || 3||*

विश्वानि नो दुर्गहा जातवेदः सिन्धुं न नावा दुरिताऽतिपर्षि ।

*viśvā̍ni no du̱rgahā̍ jātaveda̱ḥ sindhu̱ṁ na nā̱vā du̍ri̱tā'tiparṣi |*

अग्ने अत्रिवन्मनसा गृणानोऽस्माकं बोध्यविता तनूनाम् ॥ ४ ॥

*agne̍ atri̱vanmana̍sā gṛṇā̱no̎'smāka̍ṁ bodhyavi̱tā ta̱nūnā̎m || 4||*

पृतनाजितगं सहमानमुग्रमग्निगं हुवेम परमात्सधस्थात् ।

*pṛ̱ta̱nā̱jita̱gṁ saha̍mānamu̱grama̱gnigṁ hu̍vema para̱mātsa̱dhasthā̎t |*

स नः पर्षदति दुर्गाणि विश्वा क्षामद्देवो अति दुरिताऽत्यग्निः ॥ ५॥

*sa naḣ parṣadati durgāṇi viśvā kṣāmaddevo ati duritā'tyagniḥ || 5||*

प्रत्नोषि कमीड्यो अध्वरेषु सनाच्च होता नव्यश्च सत्सि ।

*pratnoṣi kamīḍyo adhvareṣu sanācca hotā navyaśca satsi |*

स्वां चाग्ने तनुवं पिप्रयस्वास्मभ्यं च सौभगमायजस्व ॥ ६ ॥

*svāṁ cagne tanuvaṁ piprayasvāsmabhyaṁ ca saubhagamāyajasva || 6||*

गोभिर्जुष्टमयुजो निषिक्तं तवेन्द्र विष्णोरनुसंचरेम ।

*gobhirjuṣṭamayujo niṣiktaṁ tavendra viṣṇoranusaṁcarema |*

नाकस्य पृष्ठमभि संवसानो वैष्णवीं लोक इह मादयन्ताम् ॥ ७ ॥

*nākasya pṛṣṭhamabhi saṁvasāno vaiṣṇavīṁ loka iha mādayantām || 7||*

कात्यायनाय विद्महे कन्यकुमारि धीमहि ।

*kātyāyanāya vidmahe kanyakumāri dhīmahi |*

तन्नो दुर्गिः प्रचोदयात् ॥ ८ ॥

*tanno durgiḥ pracodayāt ||8||*

ॐ शान्तिः शान्तिः शान्तिः ॥

*om śāntiḥ śāntiḥ śāntiḥ ||*